॥ ओं नमो नारायणाय ॥

# श्रीमन्नारायणीयं

गुरुवायुपुराधीशं विष्णुं नारायणं हरिम् ।
वासुदेवं जगन्नाथं कृष्णं वंदे जगद्गुरुम् ॥

## प्रथमस्कंध परिच्छेदः

## 1- अथ प्रथम दशकम्

## ॥ श्री भगवन्महिमा ॥

सान्द्रानन्दावबोधात्मकमनुपमितं देशकालावधिभ्यां
निर्मुक्तं नित्यमुक्तं निगमशतसहस्रेण निर्भास्यमानम् ।
अस्पष्टं दृष्टमात्रे पुनरुरु पुरुषार्थात्मकं ब्रह्मतत्त्वं
तत्तावद्भाति साक्षात् गुरुपवनपुरे हन्त भाग्यं जनानाम् ॥ (1.1)

एवं दुर्लभ्यवस्तुन्यपि सुलभतया हस्तलब्धे यदन्यत्
तन्वा वाचा धिया वा भजति बत जनः क्षुद्रतैव स्फुटेयम् ।
एते तावद्वयं तु स्थिरतरमनसा विश्वपीडापहत्यै
निश्शेषात्मानमेनं गुरुपवनपुराधीशमेवाश्रयामः ॥ (1.2)

सत्त्वं यत्तत्पराभ्यामपरिकलनतो निर्मलं तेन तावत्
भूतैर्भूतेन्द्रियैस्ते वपुरिति बहुशः श्रूयते व्यासवाक्यम् ।
तत्स्वच्छत्वाद्यदच्छादितपरसुखचिद्गर्भनिर्भासरूपं
तस्मिन् धन्या रमन्ते श्रुतिमतिमधुरे सुग्रहे विग्रहे ते ॥ (1.3)

निष्कम्पे नित्यपूर्णे निरवधि परमानन्दपीयूषरूपे
निर्लीनानेकमुक्तावलिसुभगतमे निर्मलब्रह्मसिन्धौ ।
कल्लोलोल्लासतुल्यं खलु विमलतरं सत्त्वमाहुस्तदात्मा
कस्मान्नो निष्कलस्त्वं सकल इति वचस्त्वत्कलास्वेव भूमन् ॥ (1.4)

निर्व्यापारोऽपि निष्कारणमज! भजसे यत्क्रियामीक्षणाख्यां
तेनैवोदेति लीना प्रकृतिरसतिकल्पाऽपि कल्पादिकाले ।
तस्यास्संशुद्धमंशं कमपि तमतिरोधायकं सत्त्वरूपं
सत्त्वं धृत्वा दधासि स्वमहिमविभवाकुण्ठ! वैकुण्ठ! रूपम् ॥ (1.5)

तत्ते प्रत्यग्र धाराधर ललित कलायावली केलिकारं
लावण्यस्यैकसारं सुकृतिजनदृशां पूर्णपुण्यावतारम् ।
लक्ष्मीनिश्शंकलीलानिलयनममृतस्यंदसंदोहमन्तः
सिंचत्संचिंतकानां वपुरनुकलये मारुतागारनाथ! ॥ (1.6)

कष्टा ते सृष्टिचेष्टा बहुतरभवखेदावहा जीवभाजाम्
इत्येवं पूर्वमालोचितमजित! मया नैवमद्याभिजाने ।
नोचेज्जीवाः कथं वा मधुरतरमिदं त्वद्वपुश्चिद्रसार्द्रं
नेत्रैः श्रोत्रैश्च पीत्वा परमरससुधाम्भोधिपूरे रमेरन् ॥ (1.7)

नम्राणां सन्निधत्ते सततमपि पुरस्तैरनभ्यर्थितान-
प्यर्थान् कामानजस्रं वितरति परमानन्दसान्द्रां गतिं च ।
इत्थं निश्शेषलभ्यो निरवधिकफलः पारिजातो हरे! त्वं
क्षुद्रं तं शक्रवाटीद्रुममभिलषति व्यर्थमर्थिव्रजोऽयम् ॥ (1.8)

कारुण्यात्काममन्यं ददति खलु परे स्वात्मदस्त्वं विशेषात्
ऐश्वर्यादीशतेऽन्ये जगति परजने स्वात्मनोऽपीश्वरस्त्वम् ।
त्वय्युच्चैरारमन्ति प्रतिपदमधुरे चेतनाः स्फीतभाग्याः
त्वं चात्माराम एवेत्यतुलगुणगणाधार! शौरे! नमस्ते ॥ (1.9)

ऐश्वर्यं शंकरादीश्वरविनियमनं, विश्वतेजोहराणां
तेजस्संहारि वीर्यं, विमलमपि यशो निस्पृहैश्चोपगीतम् ।
अंगासंगा सदा श्रीरखिलविदसि, न क्वापि ते संगवार्ता
तद्वातागारवासिन्! मुरहर! भगवच्छब्दमुख्याश्रयोऽसि ॥ (1.10)

॥ इति भगवन्महिमा प्रथम दशकम् संपूर्णम्॥